शीतोष्णवातवर्षासुखदुःखसंस्पर्शसहत्वं शौच-देन्यदेषमदमानलोभरागेर्ष्याभयक्रोधादिभिरस-चलनं अहङ्कारादिषूपसर्गसंज्ञा लोकपुरुषयोः सर्गादिसामान्यापेक्षणं कार्य्यकालात्ययभयं योगारम्भे सततमनिर्व्वेदः सत्त्वोत्साहोऽपवर्गाय धीधृतिस्मृतिबलाधानं नियमनमिन्द्रियाणां चेतसि चेतस आत्मन्यात्मनश्च धातुभेदेन शरीरावयवसंख्यानं अभीक्ष्णं सर्व्वं कारणवद्दुःखमस्वमनित्यमित्यभ्युपगमः। सर्व्वप्रवृत्तिषु दुःखसंज्ञा सर्व्वसंन्यासे सुखमित्यभिनिवेशः एष-मार्गोऽपवर्गाय अतोऽन्यथा बध्यते इत्युदयनानि व्याख्यातानि। इति चरके शारीरस्थाने पञ्चमेऽध्याये ।)

मुमुचानः, पुं, (मुञ्चति जलं इति। मुच्+"मुचि-युधिभ्यां सन्वच्च।" उणा० । २ । ८९ । इति आनच्। कित् सन्वच्च। मेघः। इति संक्षिप्त-सारोणादिवृत्तिः॥ (मुक्तः। यथा, सन्ध्यामन्त्रे।
"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।"
"स्विन्नो घर्म्माक्तो जनो मुमुचानो मुक्तो-भवति।" इति तत्र शूलविष्णुटीका॥ )

मुमूर्षुः त्रि, ( मर्त्तुमिच्छुः। मृ+सन्+उः।) आसन्नमृत्युः। ( यथा श्रीमद्भागवते ।७।८।११।
"व्यक्तं त्वं मर्त्तुकामोऽसि योऽतिमात्रं विकत्थसे।
मुमूर्षूणां हि मन्दात्मन्! ननु स्युर्विक्लवा गिरः॥")
अथ मुमूर्षुकृत्यानि। हारीतः।
'शूद्रान्नेन तु भुक्तेन उदरस्थेन यो मृतः।
स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति॥'
शूद्रान्नं शूद्रस्वामिकान्नम्। तद्दत्तमपि भोजन-काले तद्गृहावस्थितं यत् तदपि शूद्रान्नम्। तदाहाङ्गिराः।
'शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि।
निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥'
अपिशब्दात् साक्षात् तद्दत्तघृततण्डुलादि न तु तद्दत्तकपर्द्दकादिना क्रीतमपि। स्वगृहागते पुन-रङ्गिराः।
'यथायतस्ततो ह्यापः शुद्धिं यान्ति नदीं गताः।
शूद्राद्विप्रगृहेष्वन्नं प्रविष्टन्तु सदा शुचि॥'
प्रविष्टं सम्प्रदानकप्रतिग्रहादिना इति शेषः।
अतएव पराशरः।
'तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः।
द्विजातिकरसंस्पृष्टं सर्व्वं तद्धविरुच्यते॥'
स्पृशति प्रतिगृह्णाति इति कल्पतरुः॥ तच्च संप्रोक्ष्य ग्राह्यमाह विष्णुपुराणम्।
'संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतम्।'
तच्च पात्रान्तरे ग्राह्यमाह अङ्गिराः।
'स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः।
पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्॥'
एतेन स्वगृहमागतस्यैव शुद्धत्वम्।
तद्गृहगतस्य शूद्रान्नदोषभागित्वं प्रतीयते।
ततश्चैतादृगपि मुमूर्षुणा सर्व्वथा शूद्रान्नं न भोक्तव्यम्॥*॥

पूजारत्नाकरे।
'शालग्रामशिला यत्र तत्र सन्निहितो हरिः।
तत्सन्निधौ त्यजेत् प्राणान् याति विष्णोः परं पदम्॥'
लिङ्गपुराणे।
'शालग्रामसमीपे तु क्रोशमात्रं समन्ततः।
कीकटेऽपि मृतो याति वैकुण्ठभवनं नरः॥'
कीकटो मगधः॥*॥ वैष्णवामृते व्यासः।
'तुलसीकानने जन्तोर्यदि मृत्युर्भवेत् क्वचित्।
स निर्भर्त्स्य यमं पापी लीलयैव हरिं विशेत्॥
प्रयाणकाले यस्यास्ये दीयते तुलसीदलम्।
निर्व्वाणं याति पक्षीन्द्र! पापकोटियुतोऽपि सः॥'
कूर्म्मपुराणम्।
'गङ्गायाञ्च जले मोक्षो वाराणस्यां जले स्थले।
जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे॥'
स्कान्दे।
'गङ्गायां त्यजतः प्राणान् कथयामि वरानने!।
कर्णे तत् परमं ब्रह्म ददामि मामकं पदम्॥'
तथा।
'तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते।
अत्र दानं जपो होमो गङ्गायां नात्र संशयः॥
अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥'
गव्यूतिः क्रोशयुगम्। तीर्थचिन्तामणौ ब्रह्म-पुराणम्।
'अत्र दूरे समीपे च मध्यं योजनद्वयम्।
गङ्गायां मरणेनेह नात्र कार्य्या विचारणा॥'*॥
एवं गङ्गादिमरणेन प्राप्तब्रह्मलोकस्याप्यौर्द्ध-देहिकी क्रिया तदधिकारिणा कर्त्तव्या नित्य-त्वात्। तथा च श्रीमद्भागवते।
'कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः।
आत्मन्यात्मानमावेश्य सोऽन्तःश्वासमुपारमत्॥
संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले।
सर्व्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये॥
तस्य निर्हरणादीनि संपरेतस्य भार्गव!।
युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोऽभवत्॥'
कृष्णे आत्मनि परमात्मनि आत्मानं स्वीयात्मानं निवेश्य एकीकृत्य स भीष्मः उपारमत् मुक्तिं गतवान्। निष्कले निरुपाधौ ब्रह्मणि संपद्य-मानं मिलितं आज्ञाय ज्ञात्वा तस्य भीष्मस्य निर्हरणादीनि संस्कारादीनि संपरेतस्य सम्यक् परेतस्य मुक्तस्यापि। भार्गवेति शौनकस्य सम्बोधनम्। एवञ्च एतेषामपि तत्तत्कर्म्मणि तत्तद्वचनोपात्तप्रेतपदस्य पितृपदस्य च मन्त्रा-दिषु यथायथं वाचनिकत्वात् प्रयोगः सङ्गच्छते।
'आसन्नमृत्युना देया गौः सवत्सा च पूर्व्ववत्।
तदभावे च गौरेका नरकोद्धारणाय वै॥
तदा यदि न शक्नोति दातुं वैतरणीञ्च गाम्।
शक्तोऽन्योऽरुक् तदा दत्त्वा श्रेयो दद्यान्-मृतस्य च॥'
पूर्व्ववद्धेमयुक्ताङ्गादिना।
अत्र मृतस्य चेति श्रवणात् एकादशाहेऽपि वैतरणीदानाचारः। वनपर्व्वणि।

'सार्थः प्रवसतो मित्रं भार्य्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥"
वराहपुराणे।
"व्यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः।
पुण्यकालास्तदा सर्व्वे यदा मृत्युरुपस्थितः॥
गोभूतिलहिरण्यादि दत्तमक्षयतामियात्॥"
निरवकाशत्वादत्र मलमासादिदोषो नास्ति सूतकमपि न। तथा च शुद्धिरत्नाकरे दक्षः।
"मृत्युकाले त्विदं सर्व्वं सूतकं परिकीर्त्तितम्।
आपद्गतस्य सर्व्वस्य सूतकेऽपि न सूतकम्॥"
इति शुद्धितत्त्वम्॥

मुर, श वेष्टने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) पवर्गशेषादिः। श मुरति दृषं लता। मोरिता। इति दुर्गादासः॥

मुरं क्ली, ( मूर्य्यते इति। मुर्+अप्रत्यापीति भावे कः।) वेष्टनम्। इत्यमरटीकायां मथुरेशः॥

मुरः, पुं, ( मुरति वेष्टतेऽसौ। मुर्+इगुपधत्वात् कर्त्तरि कः ) दैत्यविशेषः। इति मेदिनी। रे, ७७। यं हत्वा विष्णुर्मुरारिनामाभूत्॥ (यथा, श्रीमद्भागवते। ३। ३। ११।
"शम्बरं द्विविदं बाणं मुरं बल्वलमेव च।
अन्यांश्च दन्तवक्रादीनवधीत् कांश्च घातयत्॥")

मुरगण्डः, पुं, ( मुरं वेष्टनमिव गण्डति रुजति अनेन। गण्ड+अच्।) वरण्डः। इति जटाधरः। वर्षक इति भाषा॥

मुरजः, पुं, (मुरात् संवेष्टनात् जायतेऽसौ। मुर+जन+डः।) मृदङ्गः। इत्यमरः। १। ७। ५॥ ( यथा, रामायणे। २। ३८। ४९।
"मुरजपणवमेघघोषवद्-
दशरथवेश्म बभूव यत् पुरा।
विलपितपरिदेवनाकुलं
व्यसनगतं तदभूत् सुदुःखितम्॥")

मुरजफलः, पुं, (मुरजवत् फलमस्य।) पनसवृक्षः। इति त्रिकाण्डशेषः॥

मुरण्डः, पुं, (मुरेण वेष्टनेन अण्ड इव गोलाकृति-रिव। शकन्ध्वादित्वादकारस्य पररूपम्।) सम्यकदेशः। तद्देशस्थे, पुं भूम्नि। इति हेमचन्द्रः। ४। २७॥

मुरन्दला, स्त्री, ( मुरं वेष्टनं सेतुं दलति भिनत्ति। दल्+अच्+स्त्रियां टाप्।) नर्म्मदा-नदी। इति त्रिकाण्डशेषः॥

मुरमर्द्दनः, पुं, ( मुरं तन्नामानमसुरं मर्द्दयति चूर्णीकरोतीति। मृद्+ल्युः।) विष्णुः। इति पुराणम्॥

मुररिपुः, पुं, ( मुरस्य रिपुः।) विष्णुः। इति शब्दरत्नावली॥ ( यथा, छन्दोमञ्जर्य्याम्।२।३।
"त्वरितगतिर्व्रजयुवतिस्तरणिसुता विपिनगता।
मुररिपुणा रतिगुरुणा सह मिलिता प्रमद-मिता॥")

मुरला, स्त्री, ( मुरं वेष्टनं लाति। ला+कः।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥ ( यथा, उत्तररामचरिते।३।९॥ ततः प्रविशति नदीद्वयं